कुलजबन्धुसंहत्योः संपूर्व्वः इगुपधत्वात् कः। क्लिश्यतेः क्तः क्लिष्टम्। परस्परं पराहतं विरुद्धं परस्परपराहतम्। तत्र सरस्वतीकण्ठाभरणे तु क्लिष्टलक्षणं यथा,—
'दूरे यस्यार्थसंवित्तिः क्लिष्टं नेष्टं हि तत् सताम्।'
यथा,—
'विजितात्मभवद्वेषिगुरुपादहतो जनः।
हिमापहामित्रधरैर्व्याप्तं व्योमाभिनन्दति॥'
अस्यार्थः। विना गरुडेन जित इन्द्रस्तस्यात्मभवोऽर्ज्जुनस्तस्य द्वेषो कर्णः तस्य गुरुः पिता सूर्य्यः तस्य पादै रश्मिभिर्हतो जनो लोकः व्योम आकाशमभिनन्दति। कीदृशं हिमापहोऽग्निस्तस्यामित्रं जलं तद्धारयन्ति ये तैर्मेघैर्व्याप्तम्।" इति तट्टीकायां भरतः॥ (सङ्कीर्णता। यथा, महाभारते। ३। १४२। ३८।
"एतस्मिन् सङ्कुले तात वर्त्तमाने भयङ्करे।
अतिभारात् वसुमती योजनानां शतं गता॥")
सङ्कुलं, त्रि, (सं + कुल संस्त्याने + कः।) जनादिभिर्निरवकाशम्। तत्पर्य्यायः। सङ्कीर्णम् २। आकीर्णम् ३। इत्यमरः॥ कलिलम् ४ गहनम् ५। इति केचित्॥ सङ्कीर्य्यते स्म जनादिभिर्निरन्तरं व्याप्यते स्म सङ्कीर्णं क्षम विक्षेपे क्तः। संकुलति सङ्कुलं कुल ज बन्धुसंहत्योः संपूर्व्वंइगुपधत्वात् कः। संकुलं दन्त्यादि। शकिधातोरले शङ्कुलं तालव्यादीति स्वामी। आकीर्णं सङ्कीर्णवत्। इति भरतः॥ (यथा, महाभारते। १। ११३। २६।
"ततः सेनामुपादाय पाण्डुर्नानाविधध्वजाम्।
प्रभूतहस्त्यश्वयुतां पदातिरथसङ्कुलाम्॥")
सङ्केतः, पुं, सङ्केत्यते उच्यतेऽत्र। (सं + कित + घञ्।) स्वाभिप्रायव्यञ्जकचेष्टाविशेषः। तत्पर्य्यायः। प्रज्ञप्तिः २ परिभाषा ३ शैली ४ समयः ५ आकारः ६। इति त्रिकाण्डशेषः॥ उदाहरणं यथा,—
"सङ्केतप्रियशङ्कया निजपतिं प्रावोचदध्वश्रमम्।"
इति रससंग्रहः॥
(यथा च साहित्यदर्पणे।
"सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम्॥")
न्यायमते यथा। सङ्केतो लक्षणा चार्थे पदवृत्तिः। वृत्त्या पदप्रतिपाद्योऽर्थं एव पदार्थ इत्यभिधीयते। इदं पदमिमर्थं बोधयत्विति अस्माच्छब्दादयमर्थो बोद्धव्य इति वेच्छा सङ्केतरूपा वृत्तिः। तत्राधुनिकसङ्केतः परिभाषा। तया अर्थबोधकं पदं पारिभाषिकम्। यथा शास्त्रकारादिसङ्केतितनदीवृद्ध्यादिपदम्। ईश्वरसङ्केतः शक्तिः। तया अर्थबोधकं पदं वाचकम्। यथा गोत्वादिविशिष्टबोधकगवादिपदम्। तद्बोध्योऽर्थो गवादिर्वाच्यः स एव मुख्यार्थं इत्युच्यते। इति शक्तिवादे गादाधरी टीका॥

सङ्केतनिकेतनं, क्ली, (सङ्केतस्य निकेतनम्।) प्रियमिलनार्थावधारितगृहम्। यथा,—
"सङ्केतनिकेतने प्रियमनवलोक्य समाकुलहृदया विप्रलब्धा।
'सङ्केतकेलिगृहमेत्य निरीक्ष्य शून्यमेणीदृशो निभृतनिःश्वसिताधरायाः।
अर्द्धाक्षरं वचनमर्द्धविकाशि नेत्रं
ताम्बूलमर्द्धकवलीकृतमेव तस्थौ॥'
सङ्केतस्थलं प्रति भर्त्तुरनागमनकारणं चिन्तयति या सोत्कण्ठिता॥" इति रसमञ्जरी॥
सङ्कोचं, क्ली, सङ्कुचतीति। सं + कुच् + अच्।) कुङ्कुमम्। इत्यमरः॥
सङ्कोचः, पुं, (संकुचतीति। सं + कुच् + अच्।) मत्स्यभेदः। (सं + कुच्भावे घञ्।) बन्धः। इति मेदिनी॥ (यथा, कथासरित्सागरे। ८०। ६५।
"निनाय च निशामिन्दुविषमामब्जिनीव ताम्
बद्धमोहालिपटले हृदि सङ्कोचमेत्य सा॥")
बहुविषयक-वाक्यार्थादेरल्पविषय-स्थापनम्। यथा, सामान्यशब्दार्थस्य विशेषनिष्ठत्वं सङ्कोचः इति श्राद्धविवेकः॥ रोधः। जड़ीभाव इत्यर्थः। यथा,—
"यस्मिन् प्रमुदिते राज्ञि तमः सङ्कोचति क्षितौ॥"
इति कविकल्पद्रुमटीकायां दुर्गादासः॥
सङ्कोचनी, स्त्री, (सङ्कुचतीति। सं + कुच् + ल्युः। ङीष्।) लज्जालुलता। इति रत्नमाला॥
सङ्कोचपिशुनं, क्ली, (सङ्कोचेन पिशुनम्।) कुङ्कुमम्। इति भावप्रकाशः॥
सङ्क्रन्दनः, पुं, (सङ्क्रन्दयति असुरानिति। सं + क्रन्द + णिच् + ल्युः।) इन्द्रः। इत्यमरः॥ (भौत्यस्य मनोः पुत्त्रविशेषः। यथा, मार्कण्डेये। १००। ३२।
"श्लोमाणो च प्रतीरश्च विष्णुः सङ्क्रन्दनस्तथा।
तेजस्वी सुबलश्चैव भौत्यस्यैते मनोः सुताः॥"
सं + क्रन्द + भावे ल्युट्।) रोदने, क्ली। (यथा, महाभारते। ११। २३। ४।
"दिष्ट्या नैनं महाराज दारुणं भरतक्षयम्।
कुरु संक्रन्दनं घोरं युगान्तमनुपश्यसि॥"
सङ्क्रन्दयति शत्रूनिति। शत्रुतापके, त्रि। यथा, महाभारते। ४। ५। २६।
"तस्य मौर्व्वीमपाकर्षत् शूरः सङ्क्रन्दनो युधि।
कुले नास्ति समो रूपे यस्येति नकुलः स्मृतः॥")
सङ्क्रमः, पुं, क्ली, दुर्गसञ्चरः। साँको इति भाषा। इत्यमरः॥ संक्रामति अनेन संक्रम्यते असौ वा संक्रमः। घञ्। दुर्गं सेत्वादि सञ्चरत्यनेन दुर्गसञ्चरः करणे अल्। सञ्चरो निर्गमोऽम्बुपथः। इति रत्नकोषः। इति भरतः॥ (यथा, मनुः। ८। २८५।
"संक्रमध्वजयष्टीनां प्रतिमानाञ्च भेदकः।
प्रतिकुर्य्याच्च तत्सर्व्वं पञ्च दद्यात् शतानि च॥")

सङ्क्रमः, पुं, (सं + क्रम + घञ्।) क्रमणम्। सम्यग्राशिसञ्चारवस्तु। इति धरणिः॥ (यथा, भागवते। ४। १२। ४८।
"दिनक्षये व्यतीपाते सङ्क्रमेऽर्कदिनेऽपि वा॥")
रविसंक्रमकालो यथा,—
"त्रुटेः सहस्रभागो यः स कालो रविसङ्क्रमः॥"
इति तिथ्यादितत्त्वम्॥
सङ्क्रमणं, क्ली, (सं + क्रम + ल्युट्।) गमनम्। सूर्य्यस्य राश्यन्तरप्रवेशः। यथा। कालकौमुद्यां जावालिः।
"पूर्ण्णे चेदर्द्धरात्रे तु रविसङ्क्रमणं भवेत्।
प्राहुर्दिनद्वयं पुण्यं त्यक्त्वा मकरकर्कटौ॥"
देवीपुराणे।
"रविसङ्क्रमणे पुण्ये न स्नानायात् यस्तु मानवः।
सप्तजन्म भवेत् कुष्ठी दरिद्रश्चोपजायते॥"
इति तिथ्यादितत्त्वम्॥
(प्रापणम्। यथा, हरिवंशे। ३२। १६।
"अत्रै वोदाहरन्तीमं भरद्वाजस्य धीमतः।
धर्म्मसङ्क्रमणञ्चापि मरुद्भिर्भरताय वै॥"
सङ्क्रान्तः, त्रि, (संक्रान्तिरस्यास्तीति। अच्।) संक्रान्तिविशिष्टः। यथा,—
"असङ्क्रान्तमासोऽधिमासः स्फुटः स्यात्
द्विसंक्रान्तमासः क्षयाख्यः कदाचित्।"
इति मलमासतत्त्वम्॥
(सं + क्रम् + क्तः।) प्राप्तः। गतः। क्रमायतधनादि। यथा। स्त्रीसङ्क्रान्तधनस्य स्त्रीधनत्वाभावात् अधिकारविशेषस्यात्र वचनादप्राप्त्याकाङ्क्षया कल्पने सादृश्यात् स्त्रीसङ्क्रान्तधनमात्रस्य पूर्व्वस्वामिदायादरूपोऽधिकारी कल्पनीय एतदर्थं पत्नीपदस्य स्त्रीलक्षकत्वमिति भावः। इति दायभागटीकायां श्रीकृष्णतर्कालङ्कारः॥
संङ्क्रान्तिः, स्त्री, (सं + क्रम + क्तिन्।) राश्यन्तरसंयोगानुकूलव्यापारः। यथा,—
"नाड़ीनक्षत्रदिवसे रविभौमशनैश्चराः।
सङ्क्रान्तिं यस्य कुर्व्वन्ति तस्य क्लेशोऽभिजायते॥
इति तिथ्यादितत्त्वम्॥
रविसंक्रान्तिर्यथा। भविष्यमात्स्यज्योतिषेषु।
"मृगकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने।
विषुवती तुलामेषे गोलमध्ये तथापराः॥"
मृगो मकरः। गोलो राशिचक्रम्।
"धनुर्म्मिथुनकन्यासु मीने च षड़शीतयः।
वृषवृश्चिकसिंहेषु कुम्भे विष्णुपदी स्मृता॥"
देवीपुराणम्।
"यावद्दिशकला भुक्तास्तत् पुण्यं चोत्तरायणे।
निरंशे भास्करे दृष्टे दिनान्तं दक्षिणायने॥
अर्द्धरात्रे त्वसंपूर्ण्णे दिवा पुण्यमनागतम्।
अर्द्धरात्रे व्यतीते तु विज्ञेयं चापरेऽहनि॥
संपूर्ण्णे चार्द्धरात्रे च उदयेऽस्तमयेऽपि वा।
मानार्द्धं भास्करे पुण्यमपूर्ण्णे शर्व्वरीदले॥
सम्पूर्ण्णे तूभयोर्ज्ञेयमतिरेके परेऽहनि।